## नवमः पाठः

# आदर्शछात्रः

PVQJCB

(कृष्णवस्त्रमयं, दण्डमण्डितं, छत्रं दक्षिणहस्ते निधाय अध्यापकः सप्तम्यां कक्षायां प्रविशति, छात्रान् प्रति प्रश्नं करोति)

**अध्यापकः** – भोः भोः छात्राः! दक्षिणहस्ते इदं किं विद्यते ?

**छात्राः** – मान्याः गुरुवर्याः! भवतां दक्षिणहस्ते छत्रं विराजते।

**अध्यापकः** – साधु, साधु, साधु इति वारत्रयमुक्त्वा पुनः छात्रान् प्रतिप्रश्नं विदधाति, अनेन छत्रेण किं क्रियते ?

**छात्राः** – वन्दनीयाः गुरुवर्याः! अनेन ग्रीष्मकाले आतपात्, वर्षाकाले जलवर्षणात् च अस्माकं शरीररक्षणं क्रियते।



**अध्यापकः** – शोभनम्, शोभनम्, शोभनम् इति वारत्रयमुक्त्वा अध्यापकः छात्रान् उपदिशति। यूयं सर्वे छात्राः जानीथ? छात्र शब्दः अनेनैव छत्रशब्देन निष्पन्नो विद्यते। छत्रशब्दः आवरण वाचकः। इत्थं च ''गुरोदोषावरणं छत्रं तच्छीलं यस्य सः छात्रः'' इतिछात्रशब्दस्य सुस्पष्टः अर्थः। यूयं सर्वे अपि छात्राः भारतस्य आदर्शछात्राः भवेयुः इयं मदीया हार्दिकी शुभकामना। येन विद्यालये, समाजे, राष्ट्रे च सर्वम् अनुशासनं प्राचीना गुरुशिष्यपरम्परा सामाजिकी सुव्यवस्था, एकता, अखण्डता, साम्प्रदायिकी सद्भावना, मानवमूल्यानि च संरक्षितानि भवेयुः।

**छात्राः** – पूज्याः गुरवः! आदर्श छात्रेषु के के गुणाः अपेक्षिताः भवन्ति ? तत्प्राप्त्यर्थम् अस्माभिः किं किं करणीयम् ?

**अध्यापकः** – भोः भोः छात्राः। यूयं सर्वेसावधानाः। छात्राणामध्ययनं तपः इति आदर्शछात्रस्य मूलभूतो गुणः। अतएव आदर्शछात्रः अध्ययनशीलः भवति। सः सच्चरित्रः अनुशासितश्च भवति। स सर्वदा पित्रोः गुरोः श्रेष्ठजनानां च आज्ञां परिपालयति सामान्यछात्राणाम् अपेक्षया आदर्शछात्रेषु अधिकाः विशिष्टाः गुणाः भवन्ति।

आदर्शछात्रः प्रातः समयेनोत्थाय पित्रोः चरणौ सादरं नमति। शौचादिक्रियां समाप्य ईश्वरस्याराधनं करोति। आदर्शछात्रः हट्टे पण्यवीथिकायां निष्प्रयोजनं न परिभ्रमति।

अथ च यथोपलब्धम् आहारं विधाय अध्ययनोपकरणानि पुस्तकादीनि च नीत्वा यथा समयं विद्यालयं गच्छति। स न केवलं पाठाभ्यासं करोति, अपितु निखिलमपि सामाजिककार्यं परिश्रमेण सम्पादयति। विद्यालये स गुरुजनान् सादरं सश्रद्धं सविनयं च अभिवादयति, सहपाठिनः

मित्राणि च नमस्करोति । प्रार्थना प्रसङ्गे, अध्ययने, सांस्कृतिककार्यक्रमे क्रीडासु, सर्वेषु विद्यालयीनकार्यकलापेषु सोत्साहं प्रतिभागं करोति।

विनम्रता–सहिष्णुता–कर्त्तव्यपरायणता–अनुशासनप्रियता–सत्यनिष्ठा गुणग्राहिता विश्वबन्धुत्वादयः आदर्शछात्रस्य विशिष्टाः गुणाः भवन्ति। इदानीं छात्रेषु आदर्श – गुणानाम् अभावः दृश्यते। युष्माभिः सर्वैः आदर्शछात्राणाम् आदर्शगुणाः अनुकरणीयाः अनुसरणीयाश्च।

## शब्दार्थाः

क्रियते = किया जाता है। प्रविशति = प्रवेश करता है। निधाय = लेकर, रखकर। वारत्रयमुक्त्वा = तीन बार कहकर। आतपात् = धूप से। गुरोर्दोषावरणम् = गुरु के दोष को ढ़कना। हट्टे = बाजार में। यस्य = जिसका। वीथिकायां = गलियों में। निष्प्रयोजनम् = बिना काम के, बिना मतलब के। परिभ्रमति = घूमता है। विशिष्टाः = विलक्षण, अद्भुत। निखिलमपि = सम्पूर्ण भी। परिश्रमेण = मेहनत के साथ। गुणग्राहिता = अच्छाई को अपनाना। आवरणम् = ढकना। प्राप्त्यर्थम् = पाने के लिए।

## अभ्यासः

**प्रश्न 1. निम्नलिखित प्रश्नों के उत्तर संस्कृत में दीजिए –**

(क) कः सप्तम्यां कक्षायां प्रविशति ?

(ख) कः आदर्शछात्रस्य मूलभूतो गुणः ?

(ग) कः सर्वेषु विद्यालयीनकार्यकलापेषु सोत्साहं प्रतिभागं करोति ?

(घ) के आदर्शछात्रस्य विशिष्टाः गुणाः सन्ति ?

(ङ) सश्रद्धं सविनयं च कः अभिवादयति ?

**प्रश्न 2. रिक्त स्थानों की पूर्ति कीजिए –**

(क) भवतां दक्षिणहस्ते .............................................. विराजते।

(ख) ........................................................... छात्रान् उपदिशति।

(ग) आदर्शछात्रः मातापित्रोः .............................. सादरं नमति।

**प्रश्न 3. संस्कृत में अनुवाद कीजिए –**

(क) दाहिने हाथ में क्या है ?

(ख) अध्यापक छात्रों को उपदेश देता है।

(ग) आदर्श छात्र के कौन–कौन से गुण हैं ?

(घ) वह परिश्रम से स्वाध्याय करता है।

(ङ) वह प्रातःकाल उठकर माता–पिता के चरण छूता है।

**प्रश्न 4. सन्धि विच्छेद कीजिए –**

वारत्रयमुक्त्वा, शक्तिरेव, प्राप्त्यर्थम्, ईश्वरस्याराधनम्, यथोपलब्धम्।

PVZFDY